अर्थशतकम्

पाण्डेयोपाभिधेन
श्रीजयराजशर्मणा विरचितम्

मूल्यम् १२ आणकाः

प्रकाशक :
जयराज शर्मा
'सिन्दूर संजवनम्'
घर नंबर २५१
नं. १ रस्ता, खार
मुंबई २१

★

मुद्रक :
वि. पु. भागवत
मौज प्रिंटिंग ब्यूरो
खटाववाडी, मुंबई ४

प्रस्तावना ।

१. रूषका रूषकानुसारिणश्च देशाः स्वदेशे देशान्तरे च समाजसमतासंस्थापनाय प्रयोजनाय युक्तमयुक्तं वा विविधं विधिं प्रयुञ्जाना विजयन्ते । अमेरिकाभिधेयः प्रदेशस्तत्पक्षीयाश्च परे रूषककार्यप्रणालिकामाक्षिपन्तो बहुजनहितवर्धनोपयुक्ते कार्य्यजाते सततमुद्युक्ता अपि समाजसमतासंस्थापने प्रवृत्तां मतिं समूलमुन्मूलयितुं प्रयतमानाः प्रमीयन्ते । द्वयोरप्येतयोर्बलवतोः समासमपक्षयोः परस्पररिपुतामुपेतयोः संघर्षणतः प्राप्तप्रायः संप्रति प्रलयानुकरणशीलो महान् समरः ।

२. संभाव्यमानस्य महतः समरस्य मूलकारणं तु भौतिकसुखसाधनीभूतानां भौतिकसाधनानामुत्पादने वितरणे युक्तायुक्तोपभोगे च सदसद्व्यवस्थाया विवेकाभाव एव केवलो भाति । मानवसमाजसंहारे समुपस्थिते सति तत्तत्समाजव्यवस्थाया औचित्यमनौचित्यं वा सम्यग्विवेचनमर्हति । एतादृग् विवेचनं परं समाजशास्त्राङ्गीभूतस्यार्थशास्त्रस्य ज्ञानमपेक्षते । अर्वाचीनं पाश्चात्यैः प्रणीतमर्थशास्त्रं स्वपरदेशवस्तुस्थितिसमवबोधाय सर्वैरध्येतव्यम् ।

३. अर्थशास्त्रस्य तत्तदङ्गविश्लेषणेन पूर्णतया विवेचनं यथा पाश्चात्यैर्विहितमस्ति न तथास्मदीयैर्भारतीयैराचार्य्यैः । सर्वाङ्गपरिपूर्णमपि तद् विवेचनं तत्तद्देदेशपरिस्थितिभेदप्रभावतो भिन्नं विकृतं सङ्गतिशून्यं दुर्बोधमिति च बहुशो विभाति शिष्यवर्गेभ्यः । विशेषतस्तु सनातनधर्मानुसरणशरणेभ्यः संस्कृतभाषामात्रनिरतेभ्यो भारतीयेभ्यः सर्वापि पाश्चात्यैः प्रथिता समाजव्यवस्था दोषातिशयग्रस्ता परिस्फुरति । अर्थशास्त्रस्य विषये बहुविधो विततोऽस्ति वितथो-लोकाभिप्रायः ।

४. अर्थाभिधेयस्य विषयस्य यथार्थज्ञानं लोककल्याणकारणमिति स्पष्टमेवैतद् । अर्थशास्त्रोपदिष्टानां तत्त्वानां सम्यक्प्रसाराय निबन्ध एष प्रणीयते लेखकेन ।

५. अर्थाभिधे कुशाग्रमतिसाध्ये विषये मन्दमतेर्लेखकस्य लेखनीचापल्यं क्षाम्यन्तु क्षमाशालिनो विद्वांस इति प्रार्थयते

लेखको
जयराज शर्मा ।

विषयसूची

	श्लोकसंख्या
(१) मङ्गलाचरणम्	१
(२) सामान्यतो विषयप्रवेशः	२–२०
(३) धनवितरणकर्मण औचित्यम् ...	२१–४०
(४) वस्त्वर्घविवेचनम्	४१–५१
(५) धनवृद्धिविवेचनम्	५२–६९
(६) जनतादैन्यदूरीकरणोपायचिन्तनम् ...	७०–८१
(७) धनिकसंस्थाया निन्दा तथा च समाजसमतासंस्थायाः स्थापनस्यौचित्यम्	८२–९६
(८) उपसंहारः	९७–१००

अर्थशतकम्

विमलं भवस्य मूलं
विलसत्यणुपुञ्जपञ्जरं कमलम् ।
कमलाऽभिधानविदितं
महन् महो यत्र मध्यतोऽभ्युदितम् ॥ १ ॥

क्वचिद् रुचिरमौक्तिकं कृतकमेव निश्चीयते
सुवर्णविकृताऽऽकृतिर्निकषतोऽसती साध्यते ।
विशुद्धिविधितः क्वचिद् रजतकं च रङ्गायते
पणो नृपनियन्त्रितो न पणतोऽन्यतो मीयते ॥ २ ॥

ध्रु०—विना न धनवर्धनं भवति भो जना भोजनम् ।

लसन्ति यदि योषितः सुरुचिरत्नपर्य्यञ्चिता
द्रवन्ति यदि दासका विनयगर्भमुद्राऽङ्किताः ।
कलेव गृहदेहली यदि कृशा पदालीहता
कृषेः कृतिरिता फलं कृषककष्टसंवर्धिता ॥ ३ ॥

ध्रु०— ... ...

सुखं सुरपतेरपि प्रहसितुं यदीहाऽस्ति ते
यदा धनपतेः पदं नमयितुं मनः स्पन्दते ।
समस्तविषयैषणाः शमयितुं यदीहैधते
शरण्यमुदितं न ते द्रविणतो वरेण्याद्दते ॥ ४ ॥

ध्रु०— ... ...

शिवालयशिलालयो निजनिकायनिष्कामनः
परैः सुपरिपोषितः परिसमाप्तवित्तेप्सितः ।
विभूतिपटलैर्वृतः पटपिधानहानव्रतो
विसङ्गतयशःक्रियः सममतिर्यतिः शंसितः ॥ ५ ॥

ध्रु०— ... ...

स्वरूपसुनिरूपणे सरसवर्णनाकर्णने
सुवाससमुपासने मधुरसस्रवास्वादने ।
यदस्ति वितता रतिर्न विरतिश्च देहं प्रति
प्रियार्थपरिपूरकः पृथुगुणः पणानां गणः ॥ ६ ॥

ध्रु०— ... ...

हिमालयगतालया गतधनाः सुखं शेरते
परे विपणिवीथिकासु धनिकाः सुखेनासते ।
द्वयोरपि सुखार्थयोर्विषमता समुद्भासते
विभाति नहि भौतिकं ननु सुखं सुवर्णार्हते ॥ ७ ॥

ध्रु०— ... ...

धनार्जनविधौ परापहरणप्रथा वर्धते
समत्वमतिसंहृतिर्भवति वैभवे विस्तृते ।
तमःप्रवणता ततः प्रियतमेप्सया जायते
अनादरनिबर्हणं तदपि ते धनं रोचते ॥ ८ ॥

ध्रु०— ... ...

सुताश्रु वनिता स्थिता शतविदीर्णवस्त्रावृता
वसन्ति हतसाहसा नच हसन्ति हन्तात्मजाः ।
निशान्तगतभूर्दिवानिशि निशान्धतास्कन्दिता
अहोऽधनविषादिता ननु विषादिताऽभ्यर्हिता ॥ ९ ॥

ध्रु०— ... ...

बिभर्ति भुवनं यतो रविविभाऽभिवन्द्या सदा
शुभास्ति वसुधा सुधारसवसूनि धत्ते यदा ।
अपार्थकपदार्थको ह्ययमपायपर्य्यायक
उपैति गणनापदं सपदि संपदेकं पदम् ॥ १० ॥

ध्रु०— ... ...

सुतप्रसविनी नु या स्मृतिमताऽऽर्य्यभार्य्या हि सा
कुलक्रममनुश्रिताः खलु सुताः सुता ईरिताः ।
धनान्वयनिबन्धना जनसमाजसंयोजना
गता यदि रमा नयागमविधिक्रमा दुर्गमाः ॥ ११ ॥

ध्रु०— ... ...

अघं बहु विवर्धते यदधिकं धनं धार्य्यते
सुपात्रगणतृप्तये वितरणं ततः स्तूयते ।
यतोऽधमतमं त्वघं सति धनात्यये तायते
महीतलहितायते धनमहो महत्त्वाय ते ॥ १२ ॥

ध्रु०— ... ...

पदे परम आत्मिके विविधवैभवे भौतिके
उदेति पुरुषादरः प्रकृतितः प्रयासादृते ।
समुन्नतिपदद्वयं विधिविशेषवश्योदयं
समग्रविधिसाधनं विदितमस्ति वित्तार्जनम् ॥ १३ ॥

ध्रु०— ... ...

उपार्जनकृते कराद्यवयवव्यथा प्रथ्यते
उपात्तपरिपालनेऽनवरतं मनो मथ्यते ।
व्ययापचयतः पुनस्तनुमनोद्वयं व्यथ्यते
कषायमधुरं ततो धनरसायनं कथ्यते ॥ १४ ॥

ध्रु०— ... ...

प्रियापि वनिता धनायुतदशासु युद्धे रता
सुतास्तु विमुखा गृहाङ्गणगताश्च दूरस्थिताः ।
निरादरपराः पुरा प्रणयिनो निराशाश्रिता
अपाययतिरायता यदि लयं विभूतिर्गता ॥ १५ ॥

ध्रु०— ... ...

निरामयदशासु यद्धितकरं हि शाल्योदनं
ज्वरातिशयशालिनः स्फुरति दोषसंवर्धनम् ।
धनं किमपि संमतं प्रकृतितो न तद् गर्हितं
जघन्यपथि योजितं भवदधन्यमेतन्मतम् ॥ १६ ॥

ध्रु०— ... ...

अनागतफलाशये करतलोदितां संपदं
विहाय नहि पाल्यते परिजनैः परिव्राट्पदम् ।
स्वभौतिकसुखैषणाप्रणयिनः परिव्राजका
यदि प्रबलरागिणो जहतु के श्रियं राजकाः ॥ १७ ॥

ध्रु०— ... ...

सुधाकरसुधारसैर्भवतु तृप्तिराध्यात्मिकी
जलाशयगतैर्जलैः खलु तृषः क्षतिर्भौतिकी ।
क्रियापथपरिच्युतौ प्रियमतीन्द्रियं स्यान्नतं
सुखं तदपि दैहिकं धनवियोगतो नोदितम् ॥ १८ ॥

ध्रु०— ....

धने हितविवर्धने यदि रतिर्न संपद्यते
हितेहितविवर्जितः खलु जनो जनैर्हीयते ।
वियुज्यति जने विपत् प्रतिपदं समुत्पद्यते
विनाशविनिवृत्तये धनविकाश आदिश्यते ॥ १९ ॥

ध्रु०— ... ...

विशिष्टघटनैस्तथाऽप्यघटनैर्विभिन्नप्रभं
प्रभूतसुखसाधनं यदिह भूतपञ्चाङ्कम् ।
सदा यदुपलब्धये कृतिकलापमाकल्पितं
मतं भवति तद् धनं जगदभीष्टसंपादनम् ॥ २० ॥

ध्रु०— ... ...

कृतेः प्रकृतियोगतः स्वमतसंपदुत्पद्यते
सहायविहिता न चेन्नहि कृतिः समायुज्यते ।
सहायनिवहाय यत् समविभागतो दीयते
धनेषु धनमुत्तमं नयधुरन्धरैर्धार्य्यते ॥ २१ ॥

ध्रु०— ... ...

प्रियार्थपरिपूर्तये पृथु धनं यदा प्रेर्य्यते
तनुर्विषयभोगतस्त्वरितमेव संक्षीयते ।
जनव्रजहिताय चेदिह महद् धनं दीयते
उदेति शतमूलतश्चरति चक्रवच्चीयते ॥ २२ ॥

ध्रु०— ... ...

भवत्यपचितं धनं नियमतश्चिरं संचितं
परस्य परिपोषणे प्रणयनं हि तस्योचितम् ।
विभिन्ननययुक्तिभिः किमपि यद् धनं धार्य्यते
विना वितरणेन ते नु मरणेन विच्छिद्यते ॥ २३ ॥

ध्रु०— ... ...

रणाङ्गणजयोद्गता विविधभूभुजैः संचिताः
समुच्छ्रितपदोदिताः क्व नु गताः श्रियस्ताः श्रुताः ।
परिक्षयपराहता भवति यच्छ्रियः पूर्णता
सनातनयशोऽर्ज्यतां धनमुपार्ज्य संत्यज्यताम् ॥ २४ ॥

ध्रु०— ... ...

निजोदरदरीकृते यदिह संपदुद्दिश्यते
न शङ्कमितसंचयः सदसदध्वभिः शस्यते।
परार्थपरिपूर्तये यदि समृद्धिरन्विष्यते
हिमाचलधरा धरा बदरिका दरीदृश्यते ॥ २५ ॥

ध्रु०— ... ...

तडागगतदर्दुरैः स्वमुदरं न किं पूर्य्यते
न किं हरिणशावकैर्हरितशाद्य आसाद्यते।
उपार्ज्य निजभोजनं जगति जन्तुभिर्जीव्यते
उपार्जितविसर्जनैः पुरुषता जनैः प्रथ्यते ॥ २६ ॥

ध्रु०— ... ...

प्रफुल्लकमलोदरे मधुकदम्बकं स्याद् धृतं
परिभ्रमणतत्परैर्भ्रमरकैः परं तन्मितम्।
अगण्यमणिजालकै र्यदपि सद्म ते मालितं
परोपकृतिभिर्विना न धनगौरवं साधितम् ॥ २७ ॥

ध्रु०— ... ...

कराकलितगात्रकं निजगृहे पयःपात्रकं
जनोदयसहायकस्त्वतिततो नदः शोणकः।
नितान्ततनुकर्मभिः स्वतनुशर्म सन्तन्यते
परार्थपरिपूरणैर्हि महती मतिर्मीयते ॥ २८ ॥

ध्रु०— ... ...

दलैरपि तथा फलैः कदलिकाभिरेके भृताः
परे ह्यवरशुक्तिकान्तरितमौक्तिकैर्मण्डिताः ।
निजार्थनिरता मतिर्निगदिता निहीनोदिता
परार्थपरिपूरणी कृतिकला समभ्यर्हिता ॥ २९ ॥

ध्रु०— ... ...

श्रियातिशयमाश्रिता अलसका लसन्त्यल्पकाः
परिश्रमपराहता मृतिदशामितास्तेऽमिताः ।
क्रियाबलमनुश्रिता यदखिला फलाली मता
विभिन्नभवभूतयः श्रमिकवर्गभोगोचिताः ॥ ३० ॥

ध्रु०— ... ...

करप्रथनपण्डितैः प्रथमतो नृपैर्हीयते
सुतादिषु विभाजनैस्तनुतरं ततस्तन्यते ।
गते वयसि निर्गतार्थकमथैतदुत्पद्यते
धनं यदिह चीयते प्रकृतितोऽन्यतो नीयते ॥ ३१ ॥

ध्रु०— ... ...

यदा मनुजकामना मितिहता न पूर्तिक्षमा
प्रपूर्तिपदभावना बहुविकल्पभूर्दुर्गमा ।
समानजनुषो जना न गुणतोऽन्यतो वा समाः
श्रियः समविभाजका गतिहताः समस्तागमाः ॥ ३२ ॥

ध्रु०— ... ...

धनेन समता गुणेन विषमे नये निन्दिता
क्षणं क्षितिपरक्षिताऽपि नियतिक्षता वीक्षिता ।
महाद्रिशिरसि स्थिरा ननु नदी हिमेनाचिता
अवातरति वारिधिं प्रकृतितस्त्ववाग् वाहिता ॥ ३३ ॥

ध्रु०— ... ...

धनेन समता भवेन् नृपपदातिशक्त्या धृता
पदातिवशगा तु सा समुदिता दशा दासता ।
उपार्जितविसर्जनोचितविधिः समन्विष्यतां
प्रियाऽपि समता क्रियाविधिसुदुःसहा त्यज्यताम् ॥३४॥

ध्रु०— ... ...

उपार्जनपराय ते नहि विसर्जनं रोचते
विसर्जनविधिं विना धनविवर्धनं नेष्यते ।
परस्परिपुक्रियाद्वयसमन्वयोऽन्विष्यतां
निजार्थपरिपूर्तये परहितं पुरो धीयताम् ॥ ३५ ॥

ध्रु०— ... ...

स्वता क्वचन वस्तुनि क्वचन वा जने स्वामिता
न नेत्रपदवीमिता न नययुक्तिभिः संमिता ।
असत्प्रकृतिका हि सा व्यवहृतौ गृहीता स्थिता
समाजहितकाम्यया किमपि केवलं कल्पिता ॥ ३६ ॥

ध्रु०— ... ...

जनोपकरणे रता न यदि वस्तुनः स्वामिता
वृथोपचयमाश्रिता नृपविलुण्ठनायोचिता ।
विपातिशयविस्तृता श्वयथुशालिविस्फोटिका
न शस्त्रविधितोऽन्यथा शिथिलितव्यथा स्याद् यथा ॥ ३७ ॥

ध्रु०— ... ...

परस्वहरणे हता यदि नयव्यवस्थोच्यते ।
न पापसमुपार्जितापहरणे नयो भज्यते ।
परस्य हनने परः खलु वधेन ना दण्ड्यते
वधोद्यतरिपोर्वधः परमपौरुषं मन्यते ॥ ३८ ॥

ध्रु०— ... ...

परोपकृतितत्परैः करतले त्रिलोकी धृता
निजार्थपरिपूरका निजजनानभीष्टाः स्थिताः ।
सती परहितार्थिता नहि सती प्रिया स्वामिता
परोदयवशंवदा परवशा स्वता संमता ॥ ३९ ॥

ध्रु०— ... ...

न वारणगणै र्धनापचयवारणं पार्य्यते
रमाचरणचारणा न रणचर्यया ऽऽचर्यते ।
चिरादिह रहश्चितं धनमहोऽचिरात् क्षीयते
यथाविधिविसर्जनैर्धनमुपार्जितं चीयते ॥ ४० ॥

ध्रु०— ... ...

विचारनिवहो धनं नरहितस्य चेत् साधनं
चरित्रमुचितं धनं यदि सुखस्य संवर्धनम् ।
धरातलमिदं धनं विविधभोगसंपद्घनं
मणिः क्षणिकमण्डनं हितवहा प्रवृत्तिर्धनम् ॥ ४१ ॥

ध्रु०— ... ...

विचारपरिवर्तने गुणगणो विशीर्णो धने
नयायनविवर्जने सुखभराभिघातो जने ।
धरातलधनार्थनेऽमितनराः प्रमीता रणे
ऋते नरहिते रतेर्न धनताऽऽनता भूतले ॥ ४२ ॥

ध्रु०— ... .

धनस्य धनता यदा परहितार्थसार्थस्थिता
परस्य च हितार्थता तनुमनोदशाधिष्ठिता ।
रता विपरिवर्तने यदि दशा समस्ता मता
न किञ्चिदपि निश्चिता नु धनता मनःकल्पिता ॥ ४३ ॥

ध्रु०— ... ...

न हीरकमणिः शिलाशकलतः कणोऽप्यद्भुतः
शिलामणिकणार्घयोरिह महान् विभेदः कुतः ।
मणिर्यदिह रोचते न च शिलेति चेन् मन्यते
किमस्ति ननु कारणं जनमनोरुचे रुच्यताम् ॥ ४४ ॥

ध्रु०— ... ...

दिवाकरकराहतो बहुमुखो मणिर्द्योतते
शिला च न तथेति चेद् रविविभा न किं रोचते ।
क्षणोदयलया मणौ दिनमणेर्हया भान्ति ये
युनन्ति मनसा गतिं गतियुतं मनो मोदते ॥ ४५ ॥

ध्रु०— ... ...

न वस्तुषु विशेषता गुणयुतिः क्रियाकारिता
महार्घपरिचायिका मतिमता विनिर्धारिता ।
तरङ्गतरला मनोरतिरितस्ततः सन्तता
मनोरमपदोदिताऽप्युत महार्घनाम्नाङ्किता ॥ ४६ ॥

ध्रु०— ... ...

श्रमेण महता कृतः फलहतोऽद्रिशृङ्गाश्रयः
ऋते श्रमकृतेर्नतः शुभफलो दिनेशोदयः ।
परिश्रममहार्घयोर्नयबलान्वितो नान्वयो
महार्घ इह मानसीमितिरिति प्रणीतो नयः ॥ ४७ ॥

ध्रु०— ... ...

क्वचित् कचति चर्मणि क्व च कणे कपर्दे पणे
क्वचिन् मितिमिता मणौ क्वचन राजते राजते ।
समान इह वस्तुनि त्वसमतो यतो मीयते
न वस्त्वनुगताऽर्घता तरतमार्हता विद्यते ॥ ४८ ॥

ध्रु०— ... ...

धनापनयने नता कलहदायिनी कीर्तिता
मदान्ध्यकरणे रता मरणकारणाग्रे गता।
रसैरमधुरा मिताऽपि मदिरा महार्घान्विता
गुणातिशयनिश्चिता नहि मता महार्घार्हता ॥ ४९ ॥

ध्रु०— ... ...

श्रमस्रुतपयोमयः पणगणो यदा पूर्य्यते
गणातिशयदोषतः स तु सतोऽर्घतः क्षीयते।
महागणगुणानुगा यदि महार्घता नेष्यते
महार्घमितिसाधकः कतमकः क्रमः कीर्त्यते ॥ ५० ॥

ध्रु०— ... ...

पयोविकृतिरेव सा हिमपदोदिता व्याकृति-
र्नहीक्षुरसतः परा खलु सिता सिताख्याऽऽकृतिः।
निजावयवतोऽन्यतोऽवयविनो यतो नोत्थिति-
रनर्घगणगुम्फिता नहि महार्घवस्तुस्थितिः ॥ ५१ ॥

ध्रु०— ... ...

पटाणुगणगुम्फनक्रमविशेष एष स्थितः
पटः पटकरैः करैः प्रघटितो न भावो नवः।
पिधानकृतिकारिता विधिविशेषसंस्थापिता
मिता नवविनिर्मिता पटपदाभिधानोदिता ॥ ५२ ॥

ध्रु०— ... ...

धनं हितविवर्धनं ततमितस्ततो वर्तते
तथापि बहुवेदनावहदरिद्रता दृश्यते ।
अनन्तजनतान्वयानुगतदीनताशान्तये
नयागमगणोद्गमः कृतिपथक्रमः कीर्त्यते ॥ ५३ ॥

ध्रु०— ... ...

रसे वसति जीवनं कृषिरमुष्य संजीवनं
क्रमोनफलकः कृषिः फलतृषाऽऽक्रमो दुर्गमः ।
रसातलरसोत्करप्रणयने प्रणेयं द्वयं
रसायननिषेचनं नियतयन्त्रकैः कर्षणम् ॥ ५४ ॥

ध्रु०— ... ...

प्रवृत्तिपथवर्तिनः समुपयान्ति या यातना
न ता नियतितो नताः किमुत देवताभिस्तताः ।
सुखप्रसवसाधनव्रजवियोगतः प्रस्तुता
धनावहजनान्वहश्रमबलेन निर्मूलिताः ॥ ५५ ॥

ध्रु०— ... ...

अवृष्टिबहुवृष्टयः शलभकाश्च दावानला
रुजामुपचया महाप्रलयकारिझञ्झानिलाः ।
अपायनिवहः कृषेः पथि समन्ततो विस्तृतः
प्रवृत्तिभयतस्ततो न सुमति निवृत्तः स्थितः ॥ ५६ ॥

ध्रु०— ... ...

अधिक्षिपति यो विधिं तनुमनोदशादुःस्थितो
विमोहहतविक्रमः कृतिविधिक्रमप्रच्युतः ।
अपायशतशातितः सपदि संपदः पातितः
प्रतिक्षणमधस्तरं व्रजति नीचनिन्दोचितः ॥ ५७ ॥

ध्रु०— ... .

शरीरसुखसाधनं न यदि सर्वमासादितं
प्रवृत्तिपथबोधनं न मतिशोधनं साधितम् ।
ललाटफलकाङ्कितं फलममूल्यमङ्गीकृतं
न वस्तु नवमर्जितं यदि न वस्तुतो जीवितम् ॥ ५८ ॥

ध्रु०— ... ...

न चेदथ पुरा चितं नवधनं समन्विष्यतां
विमुच्य मलिनं बिलं विमल आलयः सेव्यताम् ।
उपायपरिमार्जनेऽनवरतं मनो योज्यतां
न कर्म परिमुच्यतां न बहुना विना मुह्यताम् ॥ ५९ ॥

ध्रु०— ... .

सुतोष उदितोऽस्ति चेत् तनुतमश्रियः स्पर्शनैः
क्रमोपचितपङ्क्तयः क्व नु सुताः स्थिताः स्युः शनैः ।
निजायतिविशुद्धये कृतिविधिर्विनिश्चीयतां
प्रबोध उपबृंह्यतां नवनवोदयो दीप्यताम् ॥ ६० ॥

ध्रु०— ... .

अतीव महती मही भुवि विभूतयो भूरिशः
अशान्तविषयैषणाविहतशान्तयः कोटिशः ।
क्वचित् कतिपये परं समुपयान्ति शर्माण्यलं
धनं जगति संचितं न जनसंघसन्तोषदम् ॥ ६१ ॥

ध्रु०— ... ...

उदीर्णशतसाहसा उदितभूत-विद्यारसाः
पुरा पतितदासका अपि पुरःश्रिया रूसकाः ।
पुराणपरिपूजका विहितहव्यकव्योद्यता
दरिद्रदशयार्दिता अहह भारतीयाः स्थिताः ॥ ६२ ॥

ध्रु०— ... ...

धरा कृषिपरिष्कृताऽतिशयशस्यसंपद्धरा
महाजलधिमार्गगास्तरणयश्च पण्यावहाः ।
नरा अरिभयङ्करा उपकृतेः कृते किङ्कराः
प्रमाणरहितोपमा क्व नु गताऽऽर्य्यभूमा रमा ॥ ६३ ॥

ध्रु०— ... ...

पुरा मलिनसद्मका वनमृगादना नग्नकाः
श्रियाऽद्य समुपाश्रिताः प्रविलसन्ति पाश्चात्यकाः ।
पुरोच्छ्रितपदादधो निपतिताः स्थिता आर्य्यका
गताऽऽगतविभूतिका विगतविद्यसद्विद्यकाः ॥ ६४ ॥

ध्रु०— ... ...

भुवो ह्यवयवोऽल्पकः प्रचुरभूतभूतिश्रितः
समृद्धिमति गोष्पदेऽपि मनुजो विपद्भिर्हतः ।
प्रसारणविधिः श्रियः समसुखावहः सृज्यतां
पुराणमपनीयतां नवभवः समुद्भाव्यताम् ॥ ६५ ॥

ध्रु०— ... ...

न सद्म यदि शर्मदं न मतिशोधनं साधनं
कुलो यदि रुजाऽऽकुलः कलहरक्त आप्तव्रजः ।
तृषारिपरिमर्दनं न यदि सद्घृताक्तौदनं
तनौ मनसि वाऽन्यतः सुखमुपस्थितं शून्यतः ॥ ६६ ॥

ध्रु०— ... ...

अनार्य्यगण एकतो वसति सज्जनस्त्वन्यत
इतः सततरोगिणो यदि निरामयास्ते ततः ।
तटद्वयपरिस्थिती रिपुतया स्थितेऽन्योन्यतः
अपूर्वचरिता श्रियः प्रचलिता सरिन्मध्यतः ॥ ६७ ॥

ध्रु०— ....

प्रियार्थपरिपूर्तये तु पुरुषैर्विधिः साध्यते
समग्रजगतो हिते कतिपये यतन्ते हि ते ।
ऋते जगत उद्धृतेः सुखमनुक्षणं क्षीयते
सनातनसुखाप्तये विभवविस्तृतिः शस्यते ॥ ६८ ॥

ध्रु०— ... ...

समाजहितसाधनं यदिह साधनं हीयते
तदीयपरिशोधनं सुकृतकृत्यमाकीर्त्यते ।
गजाननजपादिका यजनिका मुधा तन्यते
समग्रसुखदा यदा धनसरित्स्रुतिः क्षीयते ॥ ६९ ॥

इहैव शरदां शते यदि सुखं न संपादितं
मृते सति सुदूरतः क्वचन तन्न संभावितम् ।
सहस्रसुखगर्भिता हि वसुधा दिवोऽभ्यर्हिता
अनेकभयभूर्गतिर्नरकतोऽधिका गर्हिता ॥ ७० ॥

ध्रु०— ....

न मुक्त इति मुच्यते नियतितः प्रकृत्या नर-
स्तदुत्थगुणविग्रहस्तदुपजातवृद्धिक्षयः ।
समाज इह शातितो यदि शतामयैरुद्धृतः
स्रवन्त्यमृतबिन्दवः प्रकृतिबन्धगन्धो गतः ॥ ७१ ॥

ध्रु०— ... ...

अनन्तपुटितैर्न तैः श्रुतिपदैः शुभाशिःपरैः
प्रणामगुरुभिर्न तैर्गुरुपदप्रतिष्ठादरैः ।
व्रजन्ति जनकामनाः समयतो युतिं स्वैः फलै-
र्विधेरुदय इष्यतामुचितसाधनाऽऽसादनैः ॥ ७२ ॥

ध्रु०— ... ...

न बन्ध इह विद्यते नवनवप्रियध्वंसकः
सरित्पतिसमो रसायनगणो यतो दासकः ।
समीप्सितसुसिद्धये सुविशदः शुभो मार्गकः
प्रयत्न इह तन्यतां सततमात्मसन्तोषकः ॥ ७३ ॥

ध्रु०— ... ...

विमुग्धमतिरेकतो गुणिगणाग्रगण्योऽन्यतः
अधस्त्वधनकः स्थितोऽतिधनधन्य ऊर्ध्वं गतः ।
विपक्षपदवीस्थयोर्यदि रणस्तयोर्नेप्सितो
धनावहगुणान्वहप्रसर इष्यते सर्वतः ॥ ७४ ॥

ध्रु०— ... ...

जनप्रचुर एकतो जनपदोऽञ्जलिव्यायतः
सहस्रमितयोजनो विजनकोऽस्ति वन्योन्यप्तः ।
क्षुधामयशमाय तद् विनिमयः स्थलस्योचितः
समग्रजनभोगदः क्षितिविभाग आप्तोदितः ॥ ७५ ॥

ध्रु०— ... ...

अनन्तधनसाधनैरधिकसौख्यमुद्दिश्यते
धनातिशयसिद्धये श्रमविवृद्धिरन्विष्यते ।
परिश्रमविवृद्धितो बहुविधा व्यथा वर्धते
विभिन्नधनवर्धनं तदपि मान्यमामन्यते ॥ ७६ ॥

ध्रु०— ... ...

श्रमक्रमपरिच्युताः कति मतिक्षताः सन्ति ते
प्रलब्धलघुविद्यका हतविकाशयत्नाश्च ये ।
व्यपाश्रितसहायकाः प्रतिपदं विपन्नास्तु ते
भवन्ति नहि भाजनं जनसमाजसंस्थाऽऽदृतेः ॥ ७७ ॥

ध्रु०— ... ...

करप्रचितकोशका दिशि दिशि स्थिता देशकाः
करास्तु धनशोषका जनगणाः करोन्मोषकाः ।
करेषु परिवृद्धितो यदि धनं महत् क्षीयते
धनक्षयभयोर्जितैर्जनगणैः श्रमस्तन्यते ॥ ७८ ॥

ध्रु०— ... ...

महार्घपदवीषु या बदरिका धनाढ्यैर्वृता
दरिद्रजनतासु सा विगतमूल्यतामाश्रिता ।
धनाधिकदशासु या व्यवहृतिर्महार्घा नु सा
क्वचिद्छ्रमभराऽऽनता क्वचिदवाप्तिहानोत्थिता ॥ ७९ ॥

ध्रु०— ... ...

कृषिप्रसरणे रता वृतकपोतवृत्तिव्रता
अभूरिफलतोषिता विधिवरप्रसादश्रिताः ।
प्रमोदगणसाधनैर्विरहिताश्च ये मोदिता
लसन्ति न नवाश्रिया यदि वसन्ति ते निष्क्रियाः ॥ ८० ॥

ध्रु०— ... ...

जलेचरभृतोदरा मृगयया भृता वा नराः
कृषिप्रथितवृत्तिका उत पशूपरक्षापराः ।
परिश्रमपरिप्लुतं प्रवरभोगमाभुञ्जतां
भजन्ति नहि विक्रयक्रयजभूतिसंपूर्णताम् ॥ ८१ ॥

ध्रु०— ... ...

यथागुणविभाजितं भवति कर्म संपत्प्रदं
बहुत्वमपि संपदां मतमभीष्टसंपूरणम् ।
तथापि सुखसाधनप्रचयतोऽर्घहानिर्भवेद्
ग्रसन्ति धनिका धनं न जनता धनित्वं व्रजेत् ॥ ८२ ॥

ध्रु०— ... ...

प्रजाप्रजननक्रिया धनविवृद्धितः सत्वरा
तयोस्तु समकालता प्रकृतितो मता दुष्करा ।
प्रजातिशयवृद्धितोऽतितनुता धनानां भवेत्
ततश्च जनतागताऽतितमदीनताऽविर्भवेत् ॥ ८३ ॥

ध्रु०— ... ...

न भूतनिकरः कृतस्तदपि तत्प्रभुत्वं कृतं
प्रभूतजनतार्जितं कतिपयैर्बलान्निर्जितम् ।
स्वभूतिपरिवृद्धये परधनं विभूतीकृतं
न धर्म्यमपि शर्मदं धनिककर्म भात्याऽऽततम् ॥ ८४ ॥

ध्रु०— ... ...

समृद्धपदवीधरा धनिकहस्ततो या धरा
न तत्र धनिकाश्रयाः श्रमकरा हि लब्धादराः ।
न चात्र धनिकादृतेऽभ्युदय एव संभाव्यते
मनुष्यसमतोदये सुखलयः समुन्नीयते ॥ ८५ ॥

ध्रु०— ... ...

यथाकथमपि व्यथाविकलिता स्थितिः प्रथ्यतां
वृथा नु धनिकस्थितिर्यदि तदुत्थितिर्मथ्यताम् ।
युगप्रतियुगानुगा मनुजदीनता दार्य्यतां
विशालवसुधामुखे स्मितसुधासरित् स्राव्यताम् ॥ ८६ ॥

ध्रु०— ... ...

कृतेः प्रकृतितोऽथवा विषमता समन्तात् स्थिता
समाजसमता तथापि च समर्थनीया मता ।
जनैर्निजनिजोदये धनगणोऽधिकं जन्यतां
यथार्हमभिमाज्यतामथ यथेच्छमाभुज्यताम् ॥ ८७ ॥

ध्रु०— ... ...

श्रियो धनिकरश्रिताऽऽमलककल्पपादोत्पताः
करश्रमकराः परानुसरणे पराः किंकराः ।
क्रता विपणिनिश्चिता नहि भवन्ति वस्त्वर्घकाः
समाजसमतोदये सदसदर्घकाः सार्थकाः ॥ ८८ ॥

ध्रु०— ... ...

समाजसुखसिद्धये सकलसाधनान्यासते
सहायकगुणान्वयस्तदुपकारकः स्मर्य्यते ।
परस्परविरोधिभिर्धनिगणैर्यदाकृष्यते
स्वसाधनसहायकं सममतिस्तदा स्तूयते ॥ ८९ ॥

ध्रु०— ... ...

रणाङ्गणमुपेत्य ते कति मृता वराका नराः
पराक्रमणतत्परा उत निजानुरक्षापराः ।
समस्तरणकारणं धनिकसंचितं तद् धनं
समाजसमतौषधं समरसंज्ञरोगापहम् ॥ ९० ॥

ध्रु०— ... ...

समाजहितकर्मणः क्रमगणः श्रमः संमतः
श्रमानुगुण एव च श्रमफलप्रसारो हितः ।
धनिश्रमकरद्वयाऽऽश्रितरणः समार्त्तिं श्रयेद्
धनार्जकपदादधः सपदि तत्पतिर्यत् पतेत् ॥ ९१ ॥

ध्रु०— ... ...

समाजसमतोदयो लसति रूसके ह्यंशतः
क्वचिन् न धनिकार्थकः श्रमभरोऽस्ति तत्राततः ।
विभाति तु जनैषणानुगुणकः समृद्धिक्रमः
समृद्धिनियताऽर्घतः सफलितश्च सर्वः श्रमः ॥ ९२ ॥

ध्रु०— ... ...

चरेयुरधिकारिणो यदि यथेच्छमुच्चैःस्थिता
भवेयुरधिकारका जनगताश्च नीचैर्गताः ।
यदि स्थितिविपर्य्यये प्रतिभया व्यपेता जनाः
समाजसमता तदा विषसमा मता योजना ॥ ९३ ॥

ध्रु०— ... ...

इतोऽवयवतः क्षितेरितरतः श्रिये श्रीयतां
नवान्नवतरो मनोरथपथः परिप्रथ्यताम् ।
धनव्ययसुखायकद्वयसमन्वयोऽन्विष्यतां
यतो ह्युदयते युतिः शमाचितोर्नयो योज्यताम् ॥ ९४ ॥

ध्रु०— ... ...

अभूरि धनिवर्गकैः श्रिय उपार्जिताः संमताः
प्रभूतधनसाधिता भवति भौतिकी भूरिता ।
व्यवस्थितविकाशने न धनिका धनस्योचिता
व्ययायकृतयः शुभा यदि समाजसंस्थाकृताः ॥ ९५ ॥

ध्रु०— ... ...

भुवः क इह भागकः सुखयुतः स्वतः सर्वतः
क्षितेस्तलमितस्ततो निगडितं मिथो ह्यर्थतः ।
स्वराज्यधनवृद्धये विधनराज्यमुद्धार्य्यतां
सनातनसमृद्धये सुखितविश्वमातन्यताम् ॥ ९६ ॥

ध्रु०— ... ...

परोऽप्युत परेतरः प्रियपथः परिक्रम्यतां
तपोऽप्यतनु तप्यतामुत विलास आश्लिष्यताम् ।
सदैव जनसन्निधौ धनमपेक्ष्यते साधनं
शरीरमनसोः समं समभिवृद्धिसंपादनम् ॥ ९७ ॥

ध्रु०— ... ...

मृषा नु सरितः स्रुता यदि रसे तृषा न स्थिता
जिता अरय ऊर्जिता यदि मतिस्तमोवर्जिता ।
निवृत्तिमयवृत्तितो यदि सुखानुवृत्तिर्वृता
लसेदलसता सदा श्रमगुणा गरिम्णा हताः ॥ ९८ ॥

ध्रु०— ... ...

नतिप्रभृतिका कृतिः प्रसरतु प्रतीकं प्रति
समुद्धरतु संविदं सदभिधां श्रुतिः शाश्वती ।
न यावद पनीयते जनगताऽतिदीना गति-
र्हताऽऽज्यविहिताऽऽहुतिर्नहि हिता त्रयीव्याहृतिः ॥ ९९ ॥

ध्रु०— ... ...

यदाश्रयमुपेयिवान् विजयते भुवो भूपति-
र्यदुज्झितपदो द्रुतं द्रवति दीनदास्यं प्रति ।
व्यपेतविषयश्च यद् विचयते यतीनां यतिः
सदाऽस्तु सुख-साधने सति धने प्रसक्ति-स्थितिः ॥१००॥

ध्रु०— ... ...

शुद्धिपत्रम्

श्लोक ५ चरण २
पैरः सुपरिपोषितः परिसमाप्तविच्तैषणः ।

श्लोक ६ चरण २
सुवाससमुपासने रससुधासुखास्वादने ।

श्लोक १६ चरण ४
जघन्यपथयोजितं भवदधन्यमेतन्मतम् ॥ १६ ॥

श्लोक १९ चरण ३
जनैर्विरहिते विपत् प्रतिपदं समुत्पद्यते

श्लोक २२ चरणं २
तनुर्विषयभोगतस्त्वतनुवेगतो हीयते ।

श्लोक ४० चरण ३
चिरादिह रहश्चितं धनमहर्दिवं हीयते

श्लोक ५० चरण २
गणातिशयदोषतः स तु सतोऽर्धतो हीयते ।

श्लोक ५४ चरण २
क्रमोनफलिका कृषिः फलतृषाऽऽक्रमो दुर्गमः ।

श्लोक ६८ चरण ३
ऋते जगत उद्धृतेः सुखमनुक्षणं हीयते

श्लोक ६९ चरण ४
समग्रसुखदा न चेद् धनसरित् परिस्यन्दते ॥ ६९ ॥

श्लोक ७८ चरण ३
करेषु परिवृद्धितो यहि धनोदयो रुध्यते

श्लोक ८१ चरण ४
भजन्तु धनिका धनं न जनता धनित्वं व्रजेत् ॥ ८२ ॥